पूर्णप्रज्ञसंशोधनमन्दिरम्
नवदेहलीस्थमानवसंसाधनविकासमन्त्रालयाधीन-
राष्ट्रियसंस्कृतसंस्थानेन आदर्शशोधसंस्थानमिति सम्मानितम्

श्रीराघवेन्द्रतीर्थविरचितः

बह्वृचोपनिषदुक्तमन्त्रार्थसङ्ग्रहः

सम्पादकः
विद्वान् पि. वि. उपाध्यायः
ग्रन्थपालकः, पूर्णप्रज्ञसंशोधनमन्दिरम् बेङ्गलूरु - २८

प्रकाशनम्
पूर्णप्रज्ञसंशोधनमन्दिरम्
पूर्णप्रज्ञविद्यापीठम्, बेङ्गलूरु - २८

२०११

पूर्णप्रज्ञसंशोधनमन्दिरम्
नवदेहलीस्थमानवसंसाधनविकासमन्त्रालयाधीन-
राष्ट्रियसंस्कृतसंस्थानेन आदर्शशोधसंस्थानमिति सम्मानितम्

श्रीराघवेन्द्रतीर्थविरचितः

बह्वृचोपनिषदुक्तमन्त्रार्थसङ्ग्रहः

सम्पादकः
विद्वान् पि.वि. उपाध्यायः
ग्रन्थपालकः, पूर्णप्रज्ञसंशोधनमन्दिरम् बेङ्गलूरु - २८

प्रकाशनम्
पूर्णप्रज्ञसंशोधनमन्दिरम्
पूर्णप्रज्ञविद्यापीठम्, बेङ्गलूरु - २८
२०११

पूर्णप्रज्ञसंशोधनमन्दिरग्रन्थमाला – ४२

श्रीराघवेन्द्रतीर्थविरचितः

बह्वृचोपनिषदुक्तमन्त्रार्थसङ्ग्रहः

सम्पादकः

विद्वान् पि.वि. उपाध्यायः

ग्रन्थपालकः, पूर्णप्रज्ञसंशोधनमन्दिरम् बेङ्गलूरु - २८

This Publication is brought out by the generous financial help of

Rashtriya Sanskrit Samsthan, (Deemed University) New Delhi

प्रकाशनम् -

पूर्णप्रज्ञसंशोधनमन्दिरम्

पूर्णप्रज्ञविद्यापीठम्, कत्तरिगुप्पा मेन्रोड्, बेङ्गलूरु - २८

पुटानि	: xviii+30
प्रथममुद्रणम्	: २०११
मुद्रितपुस्तकसङ्ख्या	: १०००
मूल्यम्	: ४० रूप्यकाणि
मुद्रणम्	: नन्दि प्रोसेस्, बेङ्गलूरु Ph : 26772292, 26770092

POORNAPRAJNA SAMSHODHANA MANDIRAM

Recognised as 'Adarsha Shodha Sanstha' by Rashtriya Sanskrit Samsthan, (Deemed University), Ministry of H.R.D., Govt. of India, New Delhi.

BAHVṚCOPANIṢADUKTA-MANTRĀRTHASAṆGRAHAḤ

Of

Śri Rāghavendratīrtha

Editor :

Vidwan P.V. Upadhyaya

Curator, Poornaprajna Samshodhana Mandiram, Bangalore-28

Publisher :

Poornaprajna Samshodhana Mandiram, Poornaprajna Vidyapeetha, Bangalore -560 028

2011

Poornaprajna Samshodhana Mandiram Series No. 42

BAHVṚCOPANIṢADUKTA-MANTRĀRTHASAṆGRAHAḤ

Of Śri Rāghavendratīrtha

Editor : **Vidwan P.V. Upadhyaya**
Curator, Poornaprajna Samshodhana Mandiram,
Bangalore-28

Published by : **Poornaprajna Samshodhana Mandiram**
Poornaprajna Vidyapeetha,
Katriguppa Main Road,
Bangalore -560 028

This Publication is brought out by the generous financial help of
Rashtriya Sanskrit Samsthan,
(Deemed University),
New Delhi

Pages : xviii+30
First Edition : 2011
Copies : 1000
Price : 40/-
Printed by : **Nandi Process, Bangalore**
Ph : 26772292, 26770092

अनुग्रहसन्देशः

श्रीमदानन्दतीर्थभगवत्पादाचार्यप्रणीतभाष्येण, श्रीताम्रपर्णीश्रीनिवासाचार्यकृतटिप्पण्या च समलङ्कृता ऐतरेयोपनिषत् पूर्णप्रज्ञसंशोधनमन्दिरद्वारा प्रकाशितेति नितरां वयं प्रमुदिता स्मः। भाष्यानुसारी टिप्पणी चात्र प्रमेयविशेषान् प्रज्ञापयति।

अधुना श्रीमद्राघवेन्द्रतीर्थश्रीमच्चरणकृतैतरेयोदाहृतऋङ्मन्त्रार्थसङ्ग्रहः प्रकाश्यत इति विज्ञाय प्रमुदिता वयम्। श्रीमद्राघवेन्द्रतीर्थश्रीमच्चरणास्तु स्वीयापूर्ववैदुष्यपूर्णव्याख्यानेन प्रथिता टिप्पणीकारा राजन्तेतमाम् माध्वव्याख्यातृसमुदाये इति निश्प्रचम्।

तदयं ग्रन्थः समेषां विदुषां ज्ञानाभिवृद्धये भवतु। ग्रन्थस्यास्य संशोधनकर्मणि नियुक्तस्यास्मत्प्रियशिष्यस्य विदुषः श्रीवेङ्कटरमणोपाध्यायस्य कार्यमिदम् अभिनन्द्यास्मदुपास्यौ रामविठ्ठलाविमं समनुगृह्णीतामित्याशास्महे।

श्रीश्रीविश्वेशतीर्थश्रीपादाः
श्रीपेजावर-अधोक्षजमठः
उडुपि

Director's Note

We are extremely happy to submit the Bahvrchopanishadukta Mantrarthasangraha (बह्वृचोपनिषदुक्तमन्त्रार्थसङ्ग्रहः) of Sri Raghavendratirtha to the holy hands of devotees. We have published nine commentaries (Khandarthas) Isha-Kena-Katha-Prashna-Munda-Mandukya- Taittiriya-Chandogya and Brhadaranyaka upanishads and won the appreciation of scholars. Now we are publishing the text where Sri Raghavendratirtha has given valuable commentary on Upanishanmantrartha of Aitareyopanishad. Few scholars may not agree about the text composed by Sri Raghavendratirtha, but the available text colophone by itself is a clear evidence that it is composed by Sri Raghavendratirtha. We have experienced his attractive style in his commentary.

Sri Venkataramana Upadhyaya has ably edited this work. I heartily congratulate him while looking forward for his further contributions.

The source of inspiration behind this useful venture is our founder H.H. Sri Sri Vishveshatirtha Swamiji. To him we owe all we have and all we shall have. How can we repay him for his support and encouragement except through our gratitude and Pranamas !

We are grateful to Prof. Radha Vallabh Tripathi, Vice-chancellor, Rashtriya Sanskrit Samsthan (Deemed University), New Delhi, for his help and guidance at every step of our activities.

I will be failing in my duty, if I do not express my thanks to Prof. Subbarayudu, Registrar of Rashtriya Sanskrit Samsthan, New Delhi for his anytime cooperation in all our venture.

I also thank Prof. D. Prahlada Char, Chairman, Poornaprajna Samshohana Mandiram Managing Committee, for his kind support in our academic activities.

I thank M/s. Nandi Process, Bangalore, who have printed neatly. I hope they extend the same co-operation in future also.

Dr. A.V. Nagasampige
Director.

प्राङ्मुखम्

ऐतरेयोपनिषद्गतानां ऋङ्मन्त्राणां श्रीमदानन्दतीर्थभगवत्पादाचार्यपरम्परा-समागतैः श्रीमद्राघवेन्द्रतीर्थश्रीमच्चरणैः व्याख्या व्यधायि । यद्यपि ईशादि-नवोपनिषदां खण्डार्थः, श्रीमद्राघवेन्द्रतीर्थश्रीमच्चरणप्रणीत अस्मादेव संशोधनालयात् प्रकाशितः । तथापि गात्रेणाल्पीयानयं ग्रन्थः श्रीमद्राघवेन्द्रतीर्थैरेव प्रणीतो वाऽन्यैर्वा प्रणीत इति विद्यते विप्रतिपत्तिः । शैली तु तेषामेवेति ज्ञानवृद्धा व्याचक्षते । समग्रैतरेयोपनिषदः खण्डार्थः लिखितोऽपि प्रणष्टो भवेदथवाऽ-ल्पीयानेव खण्डार्थः श्रीराघवेन्द्रश्रीमच्चरणैः विलिखितः स्यात् । अथवा पूर्वाश्रमतनयेन लक्ष्मीनारायणाचार्येण ऋग्भाष्यव्याख्या विधीयत इति श्रीमच्चरणैर्न व्यरचीत्यभ्यूह्यते तथैवेहापि तद्विनेयप्रवरेण कृष्णाचार्येणैतरेयखण्डार्थः विरच्यत इति गुरुभिर्न विस्तरेण खण्डार्थः विरचित इत्यपि शक्यते वक्तुम् । अत्रोल्लिखितानां मन्त्राणां श्रीमद्राघवेन्द्रतीर्थश्रीचरणेभ्यः प्रागनन्तरमपि विहितानि व्याख्यानानि उपलभ्यन्ते । 'अप्यदूष्यमतनोदनन्तधीर्भूतभावि-भवदात्मभिः क्वचित्' इत्युक्तदिशा राघवेन्द्रपूज्यचरणप्रणीता व्याख्या परकीय-व्याख्यानाकौशलसूचिका निर्दुष्टार्थविशेषविद्योतिका च विराजतेतमाम् । अत्र द्वित्राणि निदर्शनानि निरूप्यन्ते ।

(१) प्रऽजाः । ह । तिस्रः । अतिऽआयं । ईयुः । नि । अन्याः । अर्कं ।
अभितः । विविश्रे ।

बृहत् । ह । तस्थौ । भुवनेषु । अन्तरिति । पवमानः । हरितः ।
आ । विवेश ॥ १४ ॥

(ऋ.अ.६., अ.७.,व.९.मं.१४) (ऐ.आ. २.१.१)

अत्रैके व्याचक्षते-

''यास्तिस्रः प्रजा अत्यायमीयुः अत्यायमायन् अन्यास्ता इमाः प्रजाः

अर्कमर्चनीयमग्निमभितो विविश्रे । अभितो निविष्टास्ततो न पराबभूवुः । भुवनेष्वन्तर्मध्ये बृहन्महानसावादित्यः । प्रजापतिरित्येके । तस्थौ । प्रकाशयन्नतिष्ठत् । हरितो दिशः पवमानो वायुराविवेश । आविष्टः । तथा चैतरेयब्राह्मणम् । 'प्रजा ह तिस्रो अत्यायमीयुरिति या वै ता इमाः प्रजास्तिस्रो अत्यायमायंस्तानीमानि वयांसि वङ्गावगधाश्चेरपादाः । न्यन्या अर्कमभितो विविश्र इति ता इमाः प्रजा अर्कमभितो निविष्टा इममेवाग्निं बृहद्ध तस्थौ भुवनेष्वन्तरित्यद उ एव बृहद्भुवनेष्वन्तरसावादित्यः पवमानो हरित आ विवेशेति वायुरेव पवमानो दिशो हरित आविष्टः ।' इति । वाजसनेयिनोऽप्यामनन्ति । 'स तपोऽतप्यत । स प्रजा असृजत । ता अस्य प्रजाः सृष्टाः पराबभूवुस्तानीमानि वयांसि' इत्युपक्रम्य 'प्रजा ह तिस्रो अत्यायमीयुरिति या अमूः प्रजा अत्यायन् न्यन्या अर्कमभितो विविश्र इत्यग्निर्वा अर्कस्तमिमाः प्रजा अभितो निविष्टास्ता इमाः पराभूताः । बृहद्ध तस्थौ भुवनेष्वन्तरिति प्रजापतिमेवैतदभ्यनूक्तं पवमानो हरित आ विवेशेति दिशो वै हरितस्ता अयं पवमान आविष्टः ।'' (शत.२.५.१.१-५) इति ॥

अत्र यास्तिस्रः प्रजा अत्यायमीयुः, काः प्रजास्तिस्र अग्निमभितो विविश्रे इति न ज्ञायते । ऐतरेयब्राह्मणोक्तमन्त्रे 'वयांसि वङ्गावगधाश्चेरपादा' इति पदानामाशयः न प्रतीयते ।

श्रीमद्राघवेन्द्रश्रीमच्चरणास्तु स्फुटं व्याचक्षते-

तेषामाशयोऽत्र सङ्क्षिप्य निरूप्यते-

तिस्रः प्रजाः = पिशाच-राक्षस-असुराख्याः भगवद्द्वैमुख्यात् तम आप्नुवन्ति । अन्यास्तिस्रः मनुष्योत्तम-ऋषि-देवरूपा अर्कनामकं विष्णुमाराध्य शुद्धान्तःकरणास्सन्तः श्रवणादिना विष्णुज्ञानमाप्य मुक्ता बभूवुः । तत्रापि देवा पवमानस्थं विष्णुमुपासाञ्चक्रिरे । ऋषयः स्वाध्यायेनादित्यस्थं विष्णुमुपास्य

विमुक्तिं भेजिरे । मनुष्योत्तमास्तु अग्निगतं विष्णुमुपास्य मुक्ता अभवन्निति विवेकः । तदेतद् भाष्यकारैर्विवृतम्-

'विहायस्ययनात्प्रोक्ता वयांसीति पिशाचकाः ।
वर्तितज्ञानतो वङ्गा नरास्तैरवनं सदा ॥

अन्नरूपैर्गृध्नवो हि वङ्गावगधनामकाः ।
राक्षसा असुरा ईरपादा इति समीरिताः ॥

धर्मो ज्ञानं च वैराग्यमैश्वर्यं चतुरात्मकः ।
वायुर्देवोऽत्रासुराणामैश्वर्यगुण एव हि ॥

ईरपादास्ततः प्रोक्तास्ते त्रयो विष्णुमत्यजन् ।
पराभूतास्ततस्ते तु तमस्यन्धे निपातिताः ॥

देवाश्च ऋषयो मर्त्यसत्तमा इति च त्रयः ।
आश्रिता विष्णुमेवैकं त्रिस्थानस्थितमच्युतम् ॥

अग्निस्थमाश्रिता मर्त्या विष्णुमर्काभिधं परम् ।
आ जनैरर्चितत्वात्स ह्यर्क इत्युच्यते हरिः ॥

अग्नौ कर्माणि कृत्वैव मानुषा मुक्तिभागिनः ।
कर्मभिः शुद्धसत्त्वानां कर्मत्यागोऽपि नान्यथा ।

आश्रिताः सूर्यगं विष्णुमृषयो बृहदित्यसौ ।
तेजसा बृंहणादुक्तो विष्णुरादित्य इत्यपि ॥

आदानात्सर्ववस्तूनां स्वाध्यायेनामुमाश्रिताः ।
मुच्यन्ते ऋषयो नित्यं नान्यथा तु कथञ्चन ॥

वायुस्थमाश्रिता देवाः पवमानाभिधं हरिम् ।
संसारात्पावयित्वा यन्महानन्दे मिनोत्ययम् ॥

पवमानस्ततो विष्णुर्व्यासः सर्वासु दिक्षु च ।
आश्रितो भगवान्सर्वैः सर्वत्रापि विशेषतः ॥
आश्रयात्पृथगुक्तोऽयं नित्यानन्दो रमापतिः ॥' इति । ॥ १ ॥

(२) गर्भे नु सन्नन्वेषामवेदमहं देवानां जनिमानि विश्वा ।
शतं मा पुर आयसीररक्षन्नध श्येनो जवसा निरदीयम् ॥ १ ॥

(अ.३, अ.६, व.१६.१) (ऐ.आ.२.५.१)

गर्भे । नु । सन् । अनु । एषां अवेदं । अहं । देवानां । जनिमानि । विश्वा ।

शतम् । मा । पुरः । आयसीः । अरक्षन् । अध । श्येनः । जवसा । निः । अदीयम् ॥ १ ॥

अत्र बहव एवं व्याचक्षते-

'अत्रैष श्लोकः पठ्यते । श्येनभावं समास्थाय गर्भाद्योगेन निःसृतः । ऋषिर्गर्भे शयानः सन् ब्रूते गर्भे नु सन्निति । गर्भे नु गर्भ एव सन् विद्यमानोऽहं वामदेव एषामिन्द्रादीनां देवानां विश्वा विश्वानि सर्वाणि जनिमानि जन्मान्यन्ववेदम् । अनुपूर्व्येणाज्ञासिषम् । परमात्मनः सकाशात्सर्वे देवा जाता इत्यवेदिषमित्यर्थः । इतः पूर्वं शतं बहून्यायसीरयोमयान्यभेद्यानि पुरः शरीराणि मा मामरक्षन् । अपालयन् । यथाहं शरीराद्व्यतिरिक्तमात्मानं न जानीयां तथा **मामरक्षन्नित्यर्थः** । अधाधुना श्येनः श्येनवत्स्थितोऽहं जवसा वेगेन निरदीयम् । शरीरान्निरगमम् । अनावरणमात्मानं जानन्निर्गतोऽस्मीत्यर्थः । पुरुषे ह वा अयमादित इति खण्डे गर्भ एवैतच्छयानो वामदेव एवमुवाचेत्यादिना । (ऐ.आ.२.५.१) अयमर्थः सम्यक् प्रतिपादितः ॥

श्रीराघवेन्द्रतीर्थव्याख्यासार एवमस्ति-

गर्भे विद्यमानो वामदेवः देवानां जन्मानि विश्वानि वेद । शतसङ्ख्याकाः देवाः मामरक्षन् । न तु जडशरीराणि रक्षकानि । शं सुखं अस्यास्तीति शी । ज्ञानरूपत्वात् यः, शीश्चासौ यश्चेति श्यः । तथा च सुखज्ञानरूपो विष्णुः मम स्वामीति जानन् अहं जवसा वेगेन अधः गर्भवासादधस्तात् (गर्भवासमतीत्य) निर्गतोऽस्मि ।

एतेन, 'शास्त्रदृष्ट्या तूपदेशो वामदेववत्' (ब्र.सू.१.१.३०) इत्यत्र शास्त्रदृष्टिरभेददृष्टिर्जीवब्रह्मणोरिति व्याख्यातारः निरस्ता वेदितव्याः । नात्र 'अहं मनुरभवं सूर्यश्च' इत्यादौ विशिष्टाभेद आपातप्रतीत अङ्गीकर्तुं शक्यते । विशिष्टाभेदस्य बाधितत्वात् जीवब्रह्मैक्यसाधनानुपयुक्तत्वाच्च । सर्वेषां शब्दानां लक्षणया चिन्मात्रबोधकत्वं तु न सम्भवति । गङ्गापदलक्ष्यतीरस्य प्रत्यक्षसिद्धत्वात् (पूर्वमवगतत्वात्) गङ्गापदेन लक्षणया तीरबोध उपपद्यते । निर्विशेषचिन्मात्रस्य शब्दैकसमधिगम्यत्वात् लक्ष्यार्थस्य च पूर्वमनवगतत्वात् लक्षणया चिन्मात्रबोधः न सम्भवति । अत्र 'गर्भे नु सन्' इत्यादि मन्त्रे उपास्योपासकभावेन स्वामिभृत्यभावनिरूपणेन च भेदस्यैव स्फुटमवगतेः । यत्र वामदेवेन अन्येन वा ब्रह्मण अभेदो बोध्यते तत्र अन्तर्यामितया भगवान् अहमादिशब्दैर्व्यपदिष्ट इति ज्ञेयम् । उक्तं च स्मृतौ-

सर्वान्तर्यामिको विष्णुः सर्वनाम्नाऽभिधीयते ।
एषोऽहं त्वमसौ चेति न तु सर्वस्वरूपतः ॥ इति ।

(३) मा नः स्तेनेभ्यो ये अभि द्रुहस्पदे निरामिणो रिपवोऽन्नेषु जागृधुः ।
आ देवानामोहते वि व्रयो हृदि बृहस्पते न परः साम्नो विदुः ॥१६॥

मा । नः । स्तेनेभ्यः । ये । अभि । द्रुहः । पदे । निरामिणः । रिपवः । अन्नेषु । जगृधुः ।

आ । देवानां । ओहते । वि । व्रयः । हृदि । बृहस्पते । न । परः । साम्नः । विदुः ॥ १६ ॥

अत्रैके व्याचक्षते-

‘‘हे बृहस्पते नोऽस्मान् स्तेनेभ्यः । स्त्यानमस्ति येष्विति स्तेनाश्चोराः । तेभ्यो मा दाः । तान् दर्शयति । ये चोरा द्रुहः । प्राणद्रोहस्य पदे स्थाने निरामिणो नितरां रमणशीला रिपवो हिंसकाः सन्तोऽन्नेषु परकीयेष्वभि-जागृधुः । अभिकाङ्क्षन्ति ॥ गृधु अभिकाङ्क्षायाम् । लिटि रूपम् ॥ ये च देवानां वि व्रयो विशेषेण वर्जनम् ॥ व्री व्ली इति धातू वर्जने वर्तेते । य एवं विद्वान् दक्षिणां प्रतिगृह्णाति नैनं दक्षिणा व्लीनाति । (तै.ब्रा.२.२.५.१) इत्येकस्य वर्जनार्थे दृष्टस्यापि वर्जनार्थत्वम् ॥ तत् हृदि स्वकीये हृदय आ ओहते । आवहन्ति । देवानां यागान् स्तुतीश्च न करवामेति भण्यन्त इति यावत् । तेभ्योऽस्मान् मा दा इति समन्वयः । ये पुमांसः साम्नः साममयात्त्वत्तः परः परस्तादन्यदुत्कृष्टं साम यद्रक्षोघ्नम् । साम वै रक्षोहेति । न विदुः । न जानन्ति । किन्तु सर्वसाधकं साम त्वामेव विदुषोऽस्मान् स्तेनेभ्यो मा दाः ॥’’

अत्र राघवेन्द्रतीर्थश्रीमच्चरणैरपूर्वः अर्थविशेषः निरूपितस्तस्य सारः निरूप्यते

ये च सद्गुणद्वेषिणः विष्णुद्वेषिणो वा भोगमात्रे बद्धादरा भवन्ति । तादृग्दुर्जनेभ्यः नोऽस्मान् न ब्रूहि नोपदिश । अत्र के स्तेनाः ? ये चाविद्यमानं ब्रह्मत्वं जीवे व्याख्यास्यन्ति उपदिशन्ति च त एव स्तेनाः । यदि विद्यमानं वास्तवमेव ब्रह्मत्वं नोपासते जीवस्तर्हि न स स्तेनो भवत्यपि तु मूर्खः । परगुणादीनां स्वीयत्वानुसन्धाने एव हि स्तेन इति व्यपदिश्यते । एवं चाविद्यमान-ब्रह्मत्वोऽपासकः स्तेनः भवति ।

‘ब्रह्म निर्गुणम्’ ‘अनिर्वाच्यं विश्वम्’ इति साधयतां नोऽस्मान् उपदिशेति विद्यादेवताप्रार्थनेह विहिता । अनेन जीवब्रह्मैक्यभावना न कर्तव्येति विज्ञायते ।

(अ.१, अ.६, व.१६, अं.१०)

अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः ।

विश्वे देवा अदितिः पञ्च जना अदितिर्जातमदितिर्जनित्वम् ॥१०॥

अदितिः । द्यौः । अदितिः । अन्तरिक्षम् । अदितिः । माता । सः । पिता । सः । पुत्रः ।

विश्वे । देवाः अदितिः पञ्च । जनाः । अदितिः । जातम् । अदितिः । जनिऽत्वम् ॥ १० ॥

अत्रैके व्याचक्षते-

‘‘अदितिरदानाखण्डनीया वा पृथिवी देवमाता वा सैव द्यौर्द्योतनशीलो नाकः । सैवान्तरिक्षमन्तरा द्यावापृथिव्योर्मध्ये ईक्ष्यमाणं व्योम । सैव माता निर्मात्री जगतो जननी । सैव पितोत्पादकः । ततश्च स पुत्रो मातापित्रोर्जातः पुत्रोऽपि सैव । विश्वे देवाः सर्वेऽपि देवा अदितिरेव । पञ्च जना निषाद-पञ्चमाश्चत्वारो वर्णाः । यद्वा । गन्धर्वाः पितरो देवा असुरा रक्षांसि । तदुक्तं यास्केन । गन्धर्वाः पितरो देवा असुरा रक्षांसीत्येके चत्वारो वर्णा निषादः पञ्चम इत्यौपमन्यवः । नि. ३.७. । इति । ब्राह्मणे त्वेवमाम्नातम् । सर्वेषां वा एतत्पञ्चजनानामुक्थं देवमनुष्याणां गन्धर्वाप्सरसां सर्पाणां च पितॄणां च । (ए.ब्रा.३.३१) इति । तत्र गन्धर्वाप्सरसामैक्यात्पञ्चजनत्वम् । एवं विधाः पञ्च जना अप्यदितिरेव । जातं जननं प्रजानामुत्पत्तिः साप्यदितिरेव । जनित्वं जन्माधिकरणं तदप्यदितिरेव । एवं सकलजगदात्मनाऽदितिः स्तूयते ॥’’

सर्वेषामदितित्वमत्राप्रामाणिकमिह व्याख्यातम् । तन्न मनोरमम् । अधुना **श्रीराघवेन्द्रतीर्थीयव्याख्यानसारं पश्यन्तु विदः-**

'सर्वं वा अत्तीति तददितेरदितित्वम्' इति सर्वात्तृत्वमदितेरभिहितम् । श्रुतिगतसर्वपदं व्याचख्यौ भगवान् बादरायणः- 'अत्ता चराचरग्रहणात्' इति । तथा च चराचरात्मकसर्वप्रपञ्चात्तृत्वं हि भगवत विष्णोरेवोपपद्यते न तु देवमाताया अदितेरन्यस्य यस्य कस्यचन । एवञ्च द्यौरदितिरित्यस्य अदितिनामा विष्णुः क्रीडादिहेतुना द्युशब्दवाच्यः द्युस्थः द्यौरित्युच्यते ।

अन्तरीक्षमाणत्वहेतुना अन्तरिक्षशब्दवाच्यः सन् अन्तरिस्थोऽन्तरिक्षमुच्यते । एवमुत्तरत्रापि ज्ञेयम् ।

एवं मन्त्रेषु सर्वत्रापूर्वार्थाः श्रीमद्राघवेन्द्रतीर्थश्रीमच्चरणैरभिहिता सुधीभिरध्येयाः ।

कृतज्ञतासमर्पणम्

ग्रन्थस्यास्य यथामति शोधने पेजावरमठाधीशानां श्रीश्रीमद्विश्वेशतीर्थश्रीमच्चरणानां परमानुग्रह एव प्रधानं कारणम् । पूर्णप्रज्ञविद्यापीठे मादृशानाम् आश्रयप्रदानेन द्विविधवित्तप्रदानेन नैकविधमन्त्रोपदेशेन च अनुग्राहकाणां गुरुचरणानां प्रणतिततिभिरेव केवलाभिः कार्तज्ञ्यं व्याहरामि । तपःशरीराणां लोकानुग्रहतत्पराणां गुरुचरणानां सर्वदाऽनुग्रहं सादरं प्रार्थये ।

विद्यापीठे अस्माकं न्यायवेदान्तशास्त्रग्रन्थपाठकाः विद्वत्प्रवराः श्रीमन्तः प्राचार्याः डि. प्रह्लादाचार्याः अधुना संशोधनमन्दिरस्यास्य अध्यक्षपीठे विराजमानाः मार्गदर्शनेन मामन्वगृह्णन् । तेभ्यः प्रणतयः विज्ञाप्यन्ते ।

मूलमातृकाप्रदानेन बहूपकृतवन्तः विद्यावाचस्पतिबिरुदभाजः श्रीमन्तः प्रभञ्जनाचार्याः । तदीयं हार्दमुपकारं स्मरन् वन्दनानि समर्पये ।

संशोधनमन्दिरस्य निदेशकाः श्रीमन्तः डा.आनन्दतीर्थाचार्यनागसम्पिगे महोदयाः आन्तं ग्रन्थरत्नमिदमवलोक्य अक्षरदोषादिशोधने महान्तमुपकारम् आदधुः । तेभ्यः सादरं प्रणतयः । ग्रन्थस्यास्य निर्दिष्टभागस्य अक्षरदोषनिवारणे साह्यमाचरितवान् बि.एस्. हयवदनः सुधीः । तमाशीर्भिरभिनन्दामि ।

गुर्वनुग्रहात् लब्धविद्योऽहं यथामति ग्रन्थमेनं समशोधयम् । अज्ञानेन अनवधानेन चात्र दोषाः सम्भाविताः । श्रीमदानन्दतीर्थभगवत्पादाचार्याणां तथा श्रीमद्राघवेन्द्रतीर्थश्रीमच्चरणानां च यथायोग्यसेवा मया कर्तव्येति धिया प्रवृत्तोऽहमस्मि । हंसक्षीरन्यायेन विद्वांसः गुणग्रहणपराः भवेयुरिति विज्ञापयामि ।

इति विद्वज्जनविधेयः
पि. वेङ्कटरमण उपाध्यायः
ग्रन्थपालकः, पूर्णप्रज्ञसंशोधनमन्दिरम्,
बेङ्गळूरु

॥ श्रीमद्धनुमद्भीममध्वान्तर्गत

श्रीरामकृष्णवेदव्यासात्मकश्रीलक्ष्मीहयग्रीवाय नमः ॥

श्रीमद्राघवेन्द्रतीर्थश्रीपादविरचितः

बह्वृचोपनिषदुक्तमन्त्रार्थसङ्ग्रहः

बह्वृचोपनिषत्प्रोक्तनानारूपात्मकं[१] हरिम् ।
नत्वा तदुक्तमन्त्राणां करिष्येऽर्थस्य सङ्ग्रहम् ॥

विष्णौ भक्तानामभक्तानाञ्चावान्तरविभागपूर्वकं भक्तानामुपास्यविष्णोः स्थानान्याह- 'प्रजा' इति ।

[२]प्रजा ह तिस्रोऽत्यायमीयुर्न्यन्या अर्कमभितो विविश्रे ।
बृहद्ध तस्थौ भुवनेष्वन्तः पवमानो हरित आ विवेश ॥ १ ॥

तिस्रः प्रजाः पिशाचराक्षसासुराख्याः, अत्यायम् अतिक्रमं भगवति अतिक्रमं ईयुः प्राप्ताः, भगवद्विमुखा अभूवन् ते च तमःप्राप्ता इति ज्ञेयम्, ह प्रसिद्धम् । अन्याः तिस्रः, प्रजाः इत्यनुषज्यते । अन्याः तिस्रः मनुष्योत्तमऋषिदेवरूपाः प्रजाः नितरामभितः सर्वतः अर्कम् आजनैरर्चितत्वहेतुना अर्कनामकं विष्णुम् । 'अर्च-पूजायाम्' इति धातोः, विविश्रे, विविशिरे । 'इरयोरे'[३] इति सूत्रेण 'इरे' इत्यस्य रेभावः, मनसा प्रविष्टाः, तदाश्रिताः इति यावत् । तथा अन्याः प्रजाः

---

१. 'मूर्त्यात्मकम्' इति पाठान्तरम् ।   २. ऐ.२.१.१-ऋ.८.१०१.१४
३. पा.सू.६.४१.७६

मनुष्योत्तमरूपाः नितराम् अर्कं, प्रागुक्तव्युत्पत्त्या अग्निगतमर्काभिधं विष्णुं विविश्रे । अग्निहोत्रादिकर्मभिः अग्निगतं हरिमाराध्य शुद्धान्तः-करणास्सन्तः श्रवणादिना तज्ज्ञानं सम्पाद्य मुक्ता अभवन्नित्याद्यर्थो भाष्ये-

देवाश्च ऋषयो मर्त्यसत्तमा इति ते त्रयः ।

आश्रिता विष्णुमेवैकं त्रिस्थानस्थितमच्युतम् ॥ इत्युक्त्वा,

'अग्निस्थमाश्रितामर्त्या विष्णुमर्काभिधं हरिम्' इत्युक्त्वाऽभिजयस्य प्रतीतेः भुवनेषु लोकेष्वन्तः बृहत् तेजसा बृंहितत्वहेतुना बृहदित्यु-क्तम् । आदित्यस्थं ब्रह्म ऋषीणामुपास्यतया तस्थौ ह स्थितमभूद्धि । ऋषयो हि स्वाध्यायेनादित्ये विष्णुमाश्रितास्सन्तो मुक्ता आसन्निति भावः । पवमानः संसारात् पावयित्वा महानन्दे मिनोति प्रक्षिपतीति व्युत्पत्त्या वायुस्थः पवमाननामा हरिः देवानामाश्रयभूतस्सन् हरितः दिशः आ सम्यक् प्रविष्टवान् ; व्याप्तो भवतीत्यर्थः, सर्वत्र व्याप्तं पवमानस्थं विष्णुमाश्रितास्सन्तो मुक्ता अभूवन्निति भावः ॥ १ ॥

[1]त्वयेदिन्द्र युजा वयं प्रति ब्रुवीमहि स्पृधः ।
त्वमस्माकं तव स्मसि ॥ २ ॥

हे इन्द्र ! युजा युक्तेन त्वयेत् त्वयैव सहायभूतेन, त्वत्सहायबलेनैवेति यावत्, स्पृधः शत्रून्, वयं प्रतिब्रवीमहि । हीत्यसंशयमाह । निराकुर्म इति यावत् । त्वमस्माकमसि; स्वाम्यसि वयं च तव स्मसि भृत्याः

१. ऐ.२.१.४, ऋ.८.९२.३२.

स्मः, स्म इत्यस्य 'स्मसि' इति छान्दसं रूपम् । 'इदन्तो मसिः'[1] इति सूत्रम् ॥ २ ॥

[2]अपश्यं गोपामनिपद्यमानमा च परा च पथिभिश्चरन्तम् ।
स सध्रीचीः स विषूचीर्वसान आवरीवर्ति भुवनेष्वन्तः ॥ ३ ॥

वायुं वायुस्थं विष्णुं च स्तौति । गोपां, 'गुपू- रक्षणे' आकारप्रत्ययो गुणश्च, गोप्तारम्, अनिपद्यमानं क्वचिदप्यतिष्ठन्तं, वायोस्सदा सञ्चारित्वात्तद्गतहरेरपि तथात्वादिति भावः, आ आसमन्तादित्यर्थे निपातोऽयम् । ततः परा च पराक्, पथिभिः मार्गैश्चरन्तं वायुं वायुस्थं विष्णुं च अपश्यं दृष्टवानस्मि । कीदृशो वायुः वायुसंस्थश्चेत्यत आह- स इति ॥ वायुः वायुगो विष्णुश्च सध्रीचीश्च दिशः अवक्रतया वर्तमानाः पूर्वादिदिशः, विष्वग्वर्तमानाः दिशः कोणदिशः, द्वितीयाबहुवचनम्, वसानः 'वस-आच्छादने', आच्छादयन् वर्तमानः, सर्वासु दिक्षु सर्वदा वसन्निति यावत् । भुवनेषु लोकेष्वन्तः सर्वभूतेष्वावरीवर्ति, 'वृतु-वर्तने' मरुद्गतः सदा सञ्चरन् वर्तते इत्यर्थः ॥ ३ ॥

[3]अप्रक्षितं वसु बिभर्षि हस्तयोरषाळ्हं सहस्तन्वि श्रुतो दधे ।
आवृतासोऽवतासो न कर्तृभिस्तनूषु ते क्रतव इन्द्र भूरयः ॥४॥

वायुं वायुस्थं च पुनस्तौति- हे इन्द्र, अप्रक्षितम् अक्षीणं वसु वित्तं हस्तयोर्बिभर्षि । अषाळ्हम् असह्यं सहः बलं तन्वि । तनोतेर्यणादेशः छान्दसः, श्रुतः प्रसिद्धस्त्वं दधे, लडर्थे लिट् दधासि, पुरुषव्यत्ययः । हे

१. पा.सू.७.१.४६ २. ऐ.२.१.६, ऋ.१.१६४.३१
३. ऐ.२.१.६, ऋ.१.५५.८

इन्द्र, ते तनूषु देहेषु, तनौ भूरयः अनन्ताः क्रतवः कर्तृत्वात् क्रतुनामकाः जीवाः कर्तृभिः आवृतासो न कनकावटा इव आवृतासः (वृतासः) आच्छादिताः वायुना वायुगेन च सर्वे जीवा व्याप्ता इत्यर्थः ॥ ४ ॥

[१]अपाङ् प्राङेति स्वधया गृभीतोऽमर्त्यो मर्त्येना सयोनिः ।
ता शश्वन्ता विषूचीना वियन्ता न्य१न्यं चिक्युर्न
निचिक्युरन्यम् ॥ ५ ॥

वायोर्हि प्राणापानाख्यौ रूपविशेषौ द्वौ । तत्र प्राणः अपानेन सहितः स्वधया अनन्तरूपेण हरिणा गृभीतो गृहीतः नियत इति यावत् 'हृगृहोर्भश्छन्दसि'[२] इत्युक्तेः । प्राङेति अपाङ् चैति ऊर्ध्वमधस्ताच्च गच्छति प्राणः श्वासादिव्यापारायोर्ध्वं गच्छति, अपानस्तु विण्मूत्रव्यापारायार्वाग्गच्छति । प्राणोऽपानश्च द्वावप्यानन्दरूपहरिणा नियतौ, ऊर्ध्वाधोगमनव्यापारौ सदा कुरुतः न पराग्गच्छतः तन्नियतत्वाभावे पराग्गतिरपि कदाचिद्भवेदिति भावः ॥

किञ्च स्वधया अनुगृहीतस्सन् वायुः स्वरूपेणामर्त्यो मरणरहितः **मर्त्येन** मरणशीलेन देहेन सयोनिः सहित एव वर्तते । तर्हि कथं तस्यामर्त्यत्वमित्यत तद्विवृणोति- **ता इति** ॥ ता तौ वायुस्वरूपतदेहौ शश्वन्ता शाश्वतौ मोक्षपर्यन्तमेव देहस्य सहस्थिततत्वात् शाश्वतत्वमिति भावेनाह- **वियन्ता इति** ॥ सदृशौ विषूचीना विषूचीनौ नानागती मोक्षसमये विरुद्धगमनवन्तावित्यर्थः । तदुपपादयति- **नीति** ॥ अन्यं देहं निचिक्युः ददृशुः । वायुचेतनस्य भगवत्प्राप्तिमत्त्वाददर्शनं देहस्य जडतया नाशाद्दर्शनमिति भावः ॥ ५ ॥

१. ऐ.२.१.८, ऋ.१.१६४.३८ २. वार्तिक

[१]चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा
जगतस्तस्थुषश्च ॥ ६ ॥

चित्रं चित्तरम्, अतिशयेन चित् चित्तरं, चित्तरमेव चित्रम्, अलोपः छान्दसः।सर्वचेतनोत्तमं देवानामनीकं चेष्टकत्वात्, ईशितृत्वात् कर्तृत्वाच्च अनीकम् 'अन-चेष्टायाम्' 'ईश-ऐश्वर्ये' 'डु कृञ्-करणे' देवानां चेष्टकः ईशिता कर्ता चेत्यर्थः । अनश्चासौ ई चासौ कश्चेति विग्रहः । मित्रादेश्चक्षुः-दर्शकं ज्ञानदमित्यर्थः, एतादृशं ब्रह्म उदगात् उदैत् सूर्यमण्डले स्थित्वा उदभूदित्यर्थः । सूर्यः, सूरिभिः प्राप्यत्वेन हेतुना सूर्यगतो हरिः जगतो जङ्गमस्य तस्थुषः स्थावरस्य च आत्मा आदानादिकर्ता, अन्तर्यामीति यावत् । यद्वा अत्तीत्यात्मा प्रलये संहर्तेत्यर्थः । द्यावापृथिवी अन्तरिक्षं च आप्राः आप्नोत् 'पृ-पालनपूरणयोः' प्रकाशेन पूरितवान् व्याप्तोऽभूदित्यर्थः ॥ ६ ॥

[२]बीभत्सूनां सयुजं हंसमाहुरपां दिव्यानां सख्ये चरन्तम् ।
अनुष्टुभमनु चर्चूर्यमाणमिन्द्रं नि चिक्युः कवयो मनीषा ॥ ७ ॥

बीभत्सूनां जगद्भर्तुमिच्छूनाम् अपाम् अब्देवतानां दिव्यानां द्युस्थानीयानां सख्ये सखित्वे चरन्तं हंसं हंसरूपिणं विष्णुमाहुः सयुजं ताभिः सहैव चरन्तं चाहुः । अनुष्टुभम् अनुष्टप्छन्दस्काम् ऋचं अनु चर्चूर्यमाणं पुनः पुनर्वदन्तम् इन्द्रं परमेश्वरं मनीषा मनीषया तृतीयाया लुक् अनेन कवयो ज्ञानिनः निचिक्युः । मेघसंस्थं हंसरूपं विष्णुमनुष्टुभमुच्चारयन्तं मुनयो ददृशुरित्यर्थः ॥ ७ ॥

१. ऐ.२.२.४, ऋ.१.११५.१ २. ऐ.२.३.५, ऋ.१०.१२४.९

[१]वाचमष्टापदीमहं नवस्रक्तिमृतस्पृशम् ।
इन्द्रात्परि तन्वं ममे ॥ ८ ॥

नवाक्षरचतुष्पादा बृहतीछन्दस्का ऋक्, अष्टाक्षरचतुष्पादा अनुष्टुप् । तथा च वाचमनुष्टुप्छन्दस्काम् ऋचम् अष्टापदीं चतुरक्षराष्टपदे युक्ताम् ऋतस्पृशं सत्यनामकविष्णुविषयां नवस्रक्तिं बृहतीत्येव कुर्वन् अक्षरनवपादबृहतीत्येव सम्पादयन् इन्द्रात् तस्यैन्द्रादिति व्याख्या, ऐन्द्राद् इन्द्राख्यविष्णुसम्बन्धिमुख्यप्राणात् बृहत्यभिमानिदेवता तन्वं तनुम् अनुब्रूयां हरेः प्रतिमामहं परिममे निर्मितवानस्मि इति मुनिराह । बृहतीदेवता मुख्यप्राणो, अनुष्टुब् देवता ह्युमादेवी, एवं पञ्चविंशोत्तर-शतानुष्टुबाधिक्यं भवतीति बृहत्यभिमानिप्राणाख्यप्रतिमा हरेरेका यथा सम्पादिता तथा बृहतीसहस्रशंसनेन सम्पादितप्राणाख्यभगवत्प्रतिमायाः इव अनुष्टुब्देवतोमारूपभगवत्प्रतिमान्तरमपि सम्पादिकं भवति । अतो बृहतीशंसनमेव कार्यमिति ॥ ८ ॥

[२]यदक्षरं पञ्चविधं समेति युजो युक्ता अभियत्संवहन्ति ।
सत्यस्य सत्यमनु यत्र युज्यते तत्र देवास्सर्व एकं भवन्ति ॥९॥

परमात्मनो ह्यधिदैवम्, अध्यात्मं देहाख्यं चेति रथद्वयम् । तत्राधिदैवरथे पञ्चविधं नारायणाद्यात्मना पञ्चविधमक्षरम् । 'अक्षर-मम्बरान्तधृतेः'[३] इत्युक्तरीत्या चतुर्विधनाशराहित्यनिमित्तेन अक्षर-पदवाच्यं यद् ब्रह्म समेति, नारायणादिनामकैः पञ्चविधैः स्वकीयस्त्रीरूपैः अर्धनारीपुमात्मना स्वस्मिन्नेव समेति । वामभागे स्त्रीरूपं दक्षिणभागे

१. ऐ.२.३.६, ऋ.८.७६.१२ २. ऐ.२.३.८ ३. ब्रह्मसूत्रम् १.३.१०

पुंरूपमित्येवम् अर्धनारीपुमात्मकं पञ्चविधं तिष्ठति । तदेतदित्यध्याहृत-तच्छब्दादिना अग्रे तत्र अन्वयः यच्छब्दस्य बोध्यः । युजः अर्धनारी-पुमात्मना युजो मिलिताः युक्ताः अश्वरूपेण भगवद्रथे युक्तास्सन्तो देवाः यद् ब्रह्म अभिसंवहन्ति तदेतदिति शेषः ।

'सर्वसाधुगुणत्वात्तु वायुस्सत्यमितीर्यते' इत्युक्तेः । सत्यस्य वायोः सर्वसाधुगुणस्वरूपसत्यताप्रदं तद् ब्रह्मेति यत्र यस्मिन् स्वरूपे एव युज्यते स्त्रीपुंरूपेण युज्यते । अर्धनारीपुमाकारेण वर्तत इत्यर्थः । तत्र सर्वे देवाः एकं भवति । अर्धनारीपुमाकारास्सन्तः तदेकस्थानाः भवन्तीत्यर्थः । अत्र 'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्'[१] इत्यधिकरणोक्तरीत्या भगवतः स्त्रीत्वं पुंस्त्वं चेति द्वयमप्यस्तीति समर्थनादर्धभागस्थस्त्रीरूपमपि भगवत्स्वरूपमेव । देवानां तु स्त्रीत्वे मानाभावेन स्वस्वभार्यया सह अर्धभागे भार्या, अर्धभागे पुमानित्येवमर्धनारीनरात्मकत्वं ध्येयम् । न तु भगवत इव भागद्वयमपि स्वात्मरूपम् ॥

एष नारायणो देवो अर्धनारीपुमात्मकः ।
सर्वे देवास्सभार्याश्च तं प्राप्य पुरुषोत्तमम् ॥

एकीभावं स्वभार्याभिरर्धनारीपुमात्मना ।
प्राप्यैवोपासते विष्णुं मुक्तास्संसारसागरात् ॥

इत्यादिवचनात् । ब्रह्मणस्तु- 'आत्मरतिरात्मक्रीडा, आत्ममिथुनः' इति छान्दोग्यभाष्ये सप्तमे, 'भूमोपासनयोग्यस्तु साक्षाद् ब्रह्मैव मुख्यतः'

१. ब्रह्मसूत्रम्, १.४.२४

इत्युक्त्वा 'तेनैव क्रीडते नित्यं स्त्रीरूपो मिथुनीभवेत्' इत्युक्तत्वाच्च। स्वीयमपि रूपमस्तीत्याहुः। देवास्तत्रैकं भवन्तीति विशिष्योक्तिस्तु-

यस्मिन् स्वात्मनि युक्तस्सन् रमते स्त्रीपुमात्मना।
मुनिगन्धर्वपित्राद्यैर्न तत्प्राप्यं कथञ्चन॥
प्राप्नुवन्ति सुरास्सर्वे तद्रूपं जाज्वलत्सदा।
अर्धनारीपुमाकारम्'

इत्यादिस्मृत्या देवान्याप्राप्यत्वादिति ध्येयम्॥ ९॥

[1]यदक्षरादक्षरमेति युक्तं युजो युक्ता अभियत्संवहन्ति।
सत्यस्य सत्यमनु यत्र युज्यते तत्र देवाः सर्व एकं भवन्ति॥१०॥

यस्मादक्षरात्, नारायणात् मूलरूपात् अक्षरं प्रादुर्भावरूपं युक्तं, स्त्रीपुंरूपयुक्तं समेत्यागच्छति। युजो युक्ताः इत्यादेः प्राग्वदर्थो ध्येयः। पुनरुक्तिः तात्पर्यार्था॥ १०॥

[2]यद्वाच ओमिति यच्च नेति यच्चास्याः क्रूरं यदु चोल्बणिष्णु॥
तद्वियूय कवयोऽन्वविन्दन् नामायत्ता समतृप्यंच्छ्रुतेऽधि॥
यस्मिन्नामायत्ता समतृप्यन् श्रितेऽधि तत्र देवाः
सर्वयुजो भवन्ति॥ ११॥

यद्वाचः अकारस्य ओमित्यङ्गीकाररूपशब्दः, यच्चन् इति निषेधवाची वाचो विकाररूपशब्दः यच्चास्याः वाचः विकारभूतं क्रूरम् अर्थतः कठिनं शब्दजातं, यच्चास्याः विकारभूतम् उल्बणिष्णु श्रवणाप्रियं शब्दजातं

१. ऐ.२.३.८ २. ऐ.२.३.८

तच्छब्दजातं वियूय विचार्य कवयो ज्ञानिनः, नामायत्ता नामायत्तानि; ओङ्कारादिनामार्थभूतानि भगवन्माहात्म्यादीनि, अन्वविन्दन् ज्ञातवन्तः। श्रिते तस्मिन् ज्ञाने परिपक्वे सति 'आ-पालने' इति धातोः अधि अधिकं समतृप्यन् मुक्ता अभूवन्, यस्मिन् विष्णौ नामायत्ता नामार्थभूतमाहात्म्यादीनि ज्ञात्वा तस्मिन् ज्ञाने श्रुते परिपक्वे सति तस्मिन् विष्णौ अधि अधिकं समतृप्यन्, तत्र देवाः सर्वयुजः मनो वाक्कायकर्मभिस्तत्रैव युक्ता भवन्ति। सर्वैर्युजः सर्वयुजः इति विग्रहः॥११॥

[1]आ तेन यातं मनसो जवीयसा रथं यं वामृभवश्चक्रुरश्विना।
यस्य योगे दुहिता जायते दिव उभे अहनी सुदिने विवस्वतः
॥ १२॥

हे अश्विना अश्विनौ आशुगतिमन्तौ आशुशब्दोपपदात् नयतेः क्विप् प्रत्ययः, उपपदान्तलोपो ह्रस्वश्च। ऋभवः सर्वदेवताः

आदित्या वसवो रुद्राः विश्वे[2] ऋभव इत्यपि।
सर्वदेवसमाख्या च द्वादशाब्दादिकेष्वपि॥ इति स्मृतेः॥

युवयोरर्थे यं रथम् अधिदैवस्थम् आध्यात्मं शरीराख्यं च रथं चक्रुः, तेन मनसो जवीयसा वेगवता रथेन आयातम् आगच्छतम्, शरीराख्यरथपक्षे तत्र सन्निधिं कुरुतमित्यर्थः। यस्य देहाख्यरथस्य मनोवाक्कर्मभिः सम्यग् योगे सति, विवस्वतो विविधमवासवत्त्वहेतुना विवस्वच्छब्दितान्नारायणात् दिवः श्रीदेव्या दुहिता भारत्यभिमन्यमानं भगवदपरोक्षज्ञानं सतां जायते, तथा सुदिने शोभने उभे अहनी जीवन्मुक्त्यवस्थामुक्त्यवस्थे च ये ते रथेनेत्यन्वयः॥ १२॥

१. ऐ.२.३.८, ऋ.१०.३९.१२ २. 'विश्वेदेवाः' इति मुद्रितः पाठः असाधुः।

[1]निमिषश्चिज्जवीयसा रथेनायातमश्विना ।

अन्तिषद्भूतु वामवः ॥ १३ ॥

हे अश्विना अश्ववदाशुगौ, हयास्यौ वा, जवीयसा अतिशयवेगवता रथेन आयातं, वां युष्मदीयम् अवनम् अस्माकम् अन्तिषत् समीप एव शीघ्रमेव भूतु भवतु । विकरणव्यत्ययः ॥ १३ ॥

[2]गर्भे नु सन्नन्वेषामवेदमहं देवानां जनिमानि विश्वा ।

शतं मा पुर आयसीररक्षन्न अधश्श्येनो जवसा निरदीयम्

॥ १४ ॥

गर्भे गर्भे एव सन् वर्तमानो वामदेवः एषां देवानां विश्वा विश्वानि जनिमानि जन्मानि, जनेरौणादिक इमनिच्, अहम्, अपूर्वस्य 'ओ हाक्-त्यागे' इत्यस्य कर्मणि डप्रत्यये रूपम् । क्रियाविशेषणम् । अत्यज्यमानम् अहेयमिति यावत् । दुःखादिहेयरहितत्वेन अन्ववेदं विदितवानभवम् । शतं शतसङ्ख्याकाः पुरः 'पॄ-पालनपूरणयोः' पूर्णाः आयसीः आयस्यः विशेषतो ज्ञानिन्यः 'अय-गतौ' इत्यस्मात्सुप्रत्यये सिपि छान्दसवृद्धौ च रूपत्वात् । देवता इति योज्यम् । मा माम् अरक्षन् रक्षितवन्तः । श्येनः शं सुखम् अस्यास्तीति शी, ज्ञानरूपत्वात् यः, शी चासौ यश्चेति श्यः ईकारलोपः छान्दसः, सुखज्ञानरूपो विष्णुः इनः मम स्वामीति जानन् अहं, जवसा वेगेन अधः गर्भवासादधस्तात् निरदीयं गर्भवासमतीत्य निर्गतोऽस्मि इति योज्यम् ॥ १४ ॥

---

१. ऐ. २.३.८, ऋ.८.७३.२   २. ऐ.२.५.१, ऋ.४.२७.१

[1]मा नः स्तेनेभ्यो ये अभिद्रुहस्पदे

निरामिणो रिपवोऽन्नेषु जागृधुः ।

येषां नैतन्नापरं किश्चनैकं

ब्रह्मणस्पते ब्रूहि तेभ्यः कदाचित् ॥ १५ ॥

अभिद्रुहस्पदे, अभितः सर्वतः, द्रुहो द्रोहस्य, आस्पदे स्थाने नित्यनरके स्थातुं योग्या इति शेषः । निरामिणः, रामो रमणं रमतेर्भावे घञ्, रामोऽस्यास्तीति रामी पूर्णानन्दरूपो विष्णुः, तद्विरुद्धाः निरामिणः, यद्वा रामः रमणात्मकः विष्णुः, तद्वन्तः न भवन्तीति निरामिणे विष्णौ जीवैक्यज्ञानेन तस्य नीचत्ववेदिनः इति यावत्, अत एव रामशब्दितस्य विष्णोः रिपवः, अन्नेषु भोगमात्रोपलक्षणं भोगमात्रे जागृधुः, 'गृधु-अभिकाङ्क्षायां' लिट्, आकाङ्क्षावन्तो बभूवुः ये, किश्च येषां एतत् परं ब्रह्म नास्ति, अपरं जगच्च नास्ति, किश्चन एकं निर्गुणं ब्रह्म एकमेवास्ति, जगच्च अनिर्वाच्यमस्ति इति पक्षः, एवं रूपेभ्यः स्तेनेभ्यः हे ब्रह्मणस्पते वेदपते वायो । नो अस्मान् कदाचित् मा ब्रूहि, नैव वद इति वायुं प्रति विद्याभिमानिनां प्रार्थनम् । मा ब्रूहीत्यत्र निषेधार्थकमाशब्द एव न तु माङ् ॥ १५ ॥

[2]अथोपामेनोपरमता मनुष्या ये धर्मिणो ब्रूहि तेभ्यस्सदा नः ।

आ देवानामोहते बि ब्रयो हृदि बृहस्पते न परस्साम्नो विदुः

॥१६॥

कस्मै तर्हि उपदेष्टव्या विद्येत्यत इदमुच्यते - **अथोपशमेन**

---

१. ऐ.३.१.५ ऋ.२.२३.१६   २. ऐ.३.१.५

इत्यादि । प्रागुक्तेभ्यः विलक्षणाधिकारिसूचकः अथ इति निपातः । ये मनुष्याः शमेन भगवन्निष्ठया उपरताः भगवत्येव रताः धर्मिणः वर्णाश्रमोचितधर्मवन्तः ये च साम्नः, सामनाम्नो हरेः (परः)परमम् उत्तमं न विदुः न जानन्ति ये च देवानां, व्रयः, वरत्वात् व्रः, नियमाकत्वात् यः, व्रश्चासौ यश्चेति व्रयः परशब्दे अकारलोपः, देवानां वरं सर्वनियामकं व्रयशब्दितं ब्रह्म हृदि व्यूहते व्योहते वहन्ति तेभ्यः अस्मान् हे बृहस्पते श्रीवायो, सदा ब्रूहीति वायुं प्रति विद्याभिमानिनां प्रार्थनम् ॥ १६ ॥

[१]प्रथश्च यस्य सप्रथश्च नामानुष्टुभस्य हविषो हविर्यत् ।
धातुर्द्युतानात्सवितुश्च विष्णो रथन्तरमा जभारा वसिष्ठः ॥१७॥

परस्य राज्ञः प्रथ इति नाम, असौ राजा सर्वस्य जगतः स्वमुखे हवनात् हविषा हविर्नाम्नः हवेः अनुष्टुभश्च अनुष्टुब्देवतारूपस्य नृसिंहस्य हरेः मुखे हविः यत् अन्तर्णीतण्यर्थतया अयापयत् दत्तवानित्यर्थः । तथा यस्य सप्रथ इति नाम स च राजा हविषः हविर्नाम्नः अनुष्टुभस्य अनुष्टुब्देवतारूपस्य नृसिंहस्य हरेः मुखे हविर्यत् प्राग्वदर्थः, तयोः राज्ञोः यज्ञे होतृभूतो वसिष्ठः धातुः अनिरुद्धात् द्युतानात् प्रद्युम्नात् 'द्युत-दीप्तौ' इति धातोः, सवितुः सर्वस्य प्रसवहेतुत्वात् सवितृनामकात् वासुदेवात् विष्णोः विष्णुनामकात् सङ्कर्षणात् अनिरुद्धादि-चतुर्मूर्त्यात्मकात् भगवत इति यावत्, रथन्तरम्-

'रमित्यानन्द उद्दिष्टः सम्भोग्यं थमुदाहृतम् ।
विष्णुभोग्या रतितरा लक्ष्मीरेव रथन्तरम्' ॥

---

१. ऐ. ३.१.६. ऋ.१०.१८१.१

इत्युक्तदिशा रथन्तरनामिकां रथन्तरसामदेवतां श्रियम् आजभार आजहार । चतुर्मूर्त्यात्कं देवं स्तुत्वा तेन प्रेषितश्रीदेव्या ज्ञानं लब्धवानित्यर्थः ॥ १७ ॥

[१]तेऽविन्दन् मनसा दीध्याना यजुष्कन्नं प्रथमं देवयानम् ।
धातुर्द्युतानात् सवितुश्च विष्णोर्भरद्वाजो बृहदा चक्रे अग्नेः ॥ १८ ॥

ते प्रागुक्ताः राजानौ वसिष्ठश्चेति त्रयः वक्ष्यमाणो भरद्वाजश्चेति चत्वारः 'यजुष्कन्नं प्रथमं देवयानं' यजुरादिशब्दचतुष्टयवाच्यं क्रमात् सङ्कर्षणप्रद्युम्नवासुदेवानिरुद्धभेदेन चतुर्मूर्त्यात्मकं देवं मनसा दीध्यानाः धारयन्तः ध्यायन्त इति यावत् अविन्दन् व्यजानन् लब्धवन्त इति वा । भरद्वाजः आचक्रे आहूतवान् सः अध्वर्युभूतः धात्रादिशब्दितानिरुद्धप्रद्युम्नवासुदेवसङ्कर्षणाख्यचतुर्मूर्त्यात्मकात् अग्र्यत्वहेतुना अग्निनामकात् भगवतः सकाशात् बृहत् बृहन्नामकः बृहत्सोमदेवतानारायणः वरं दत्तवानित्यर्थः ॥ १८ ॥

[२]अविन्दन्ते अतिहितं यदासीद्यज्ञस्य धाम परमं गुहा यत् ।
धातुर्द्युतानात् सवितुश्च विष्णोरासूर्यादभरन् धर्ममेते ॥ १९ ॥

एवमधिदैवयज्ञे सम्यग् हविर्दानस्तुतिध्यानादिना चतुर्णां पुरुषार्थभोगमुक्त्वा अध्यात्मनि तदुच्यते । गुहायत् हृदयगुहायां स्थितं सन्निहितम् अतीव हितं यज्ञस्य 'प्रमितं यदस्ति तज्जानाति' इति व्युत्पत्त्या सर्वज्ञस्य विष्णोः यत्तु धाम चतुर्मूर्त्यात्मकं नारायणाख्यं तेजः, (तत्) तद्देशस्थ-

---

१. ऐ.३.१.६, ऋ.१०.१८१.३ २. ऐ.३.१.६, ऋ.१०.१८१.२

यजमानभूतप्रथसप्रथनामकराजानौ होत्रध्वर्युभूतभरद्वाजौ चेति चत्वारः अविन्दन्, धात्रादिशब्दितानिरुद्धप्रद्युम्नवासुदेवसङ्कर्षणाख्य-चतुर्मूर्त्यात्मकात् सूर्यात्, सूरिप्राप्यत्वहेतुना सूर्यनामकात् नारायणात् धर्मं सर्वलोकघर्षणशब्दितसंहरणहेतुना धर्मनामकं नृसिंहं ते चत्वारः आ अभरन् आहरन् । चतुर्मूर्त्यात्मको नारायणः एतैश्चतुर्भिरभिष्टुतो नृसिंहः चतुर्भ्योऽभीष्टसिद्धिं दत्तवानिति तात्पर्यार्थः ॥ १९ ॥

[1]एकः सुपर्णः स समुद्रमा विवेश स इदं विश्वं भुवनं वि चष्टे ।
तं पाकेन मनसाऽपश्यमन्तितस्तं माता रेळ्हि, स उ रेळ्हि मातरम्
॥ २० ॥

अत्र स इति तच्छब्देन चतुष्कपर्देति पूर्वमन्त्रेण सुपर्णपदेन प्रकृतो भगवान् परामृश्यते । स एकः सुष्ठु परमानन्दरूपतया सुपर्णपदवाच्यो रमापतिः समुद्रं क्षीरसमुद्रम् आविवेश प्रविष्टवान्, सः क्षीरसमुद्रस्थः इदं विश्वं सर्वं भुवनं जगत् विचष्टे पश्यति । तं क्षीरसागरस्थं सर्वज्ञं पाकेन परिपक्वेन मनसा अन्तितः समीपे अपश्यं दृष्टवानस्मीति ऋषि-राह । माता व्यञ्जकत्वेन मातेव स्थिता सरस्वती प्राणस्थं रेळ्हि आस्वादते, प्रतिपादयति, स प्राणस्थो हरिः मातरं वाग्देवीं सरस्वतीं रेळ्हि प्रतिपाद्योऽस्ति । वाक्प्राणौ अन्योन्यं सम्बद्धौ तिष्ठतः इति भावः ॥ २० ॥

[2]अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः ।
विश्वे देवा अदितिः पञ्च जना अदितिर्जातमदितिर्जनित्वम् ॥२१॥

१. ऐ.३.१.६, ऋ.१०.११४.४ २. ऐ.३.१.६, ऋ.१.८९.१०

सर्वात्तृत्वहेतुना अदितिनामा हरिः द्यौः क्रीडनहेतुना द्युशब्दवाच्यस्सन् द्युस्थो द्यौरित्युच्यते । अन्तरीक्षमाणत्वहेतुना अन्तरिक्षशब्दवाच्यस्सन् अन्तरिक्षस्थोऽन्तरिक्षमुच्यते । सोऽदितिर्मानिनहेतुना मातृनामको मातृस्थो मातेत्युच्यते । सोऽदितिः पातृत्वहेतुना पितृनामकः पितृस्थः पितेत्युच्यते । सोऽदितिः पुत्रो नरकात् त्राणहेतुना पुत्रनामा पुत्रस्थः पुत्र इत्युच्यते । सर्वदेवेषु संस्थितोऽदितिः विश्वेदेवा इत्युच्यते । देवगन्धर्वमनुष्यपित्रसुराख्यपञ्चजनेषु स्थितः तन्नामा अदितिः पञ्चजना इत्युच्यते । जातेषु स्थितो जातनामत्वात् जातमित्युच्यते । अदितिः जनिक्रियानियामकत्वेन तत्र स्थित्वा जनित्वमित्युच्यते । जनिं तवयतीति जनित्वमिति विग्रहः । 'तव- प्रकाशे' इति धातोः ॥

[1]चित्रं देवानामुदगादनीकम् ॥ २२ ॥

पूर्वमेवव्याख्याता एषा ऋक् ॥ २२ ॥

[2]यस्तित्याज सचिविदं सखायं न तस्य वाच्यपि भागो अस्ति ।
यदीं श्रुणोत्यलकं श्रुणोति नहि प्रवेद सुकृतस्य पन्थाम् ॥२३॥

यः सचिविदं कर्मसश्चयवेदितारं प्रीत्यैव एकदेशस्थत्वात् सखायं हरिं तत्याज, त्यक्तवान्, यथावस्त्वस्ति तद्वैपरीत्यज्ञानीत्यर्थः । तस्य वाच्यपि वेदाध्ययनेऽपि भागः फलं नास्ति । यत् ईम् यदेव श्रुणोति, श्रवणं करोति, अलकम् अरकम् अरतिरूपान्धन्तमःप्राप्तिसाधनमेव शृणोति, तत्कृतश्रवणमपि तमस्साधनमेव भवतीत्यर्थः । य इत्युक्ते स इति लभ्यते । स त्यागी सुकृतस्य पन्थां पन्थानं न वेद हि, न लभेत हि, स्वर्गमार्गं न प्राप्नोति हि । 'विद्लृ-लाभे' इत्यस्य रूपमेतत् ॥

१. ऐ.३.२.३, ऋ.१.११५.१ २. ऐ.३.२.४, ऋ.१०.७१.६

अत्र विवेकः । भगवद्वस्तुयाथात्म्याज्ञाने एतद्विपरीतज्ञानमेकस्त्यागः ।

तद्भक्तद्वेषो द्वितीयः । निषिद्धविहितयोः करणाकरणे तृतीयः । अयोग्योपदेशः चतुर्थः । तत्र आद्यद्वयेन दुःखैकरूपतमःप्राप्तिः । तृतीयेन निरयप्राप्तिः । चतुर्थेन स्वर्गप्राप्तिः ॥ २३ ॥

[1]यदन्ति यच्च दूरके भयं विन्दति मामिह ॥
पवमान वि तज्जहि ॥ २४ ॥

हे पवमान, वायो, इह लोके अन्ति अन्तिके, समीपे, दूरके दूरे वा यद्भयं मां विन्दति प्राप्नोति, तद्भयं विजहि, विनाशय । 'हन-हिंसागत्योः', जादेशः ॥ २४ ॥

[2]पवमानः सो अद्य नः पवित्रेण विचर्षणिः ।
यः पोता स पुनातु नः ॥ २५ ॥

विचर्षणिः विशिष्टाः चर्षणयः प्रजाः यस्य सः विचर्षणिः, पवमानो वायुः, नोऽस्माकं स्वामी, यः पावयिता, सः पवित्रेण पवित्रनाम्ना हरिणा, तज्ज्ञानोपदेशेनेति यावत्, अद्य नः पुनातु पावयतु ॥ २५ ॥

[3]यत् ते पवित्रमर्चिष्यग्ने विततमन्तरा ।
ब्रह्म तेन पुनीहि नः ॥ २६ ॥

अग्ने, अङ्गनेतृत्वात् सर्वशरीरनियामकत्वहेतोः अग्निशब्दवाच्य हे

१. ऐ. ३.२.४, ऋ.९.६७.२१ २. ऐ.३.२.४, ऋ.९.६७.२२
३.ऐ. ३.२.४, ऋ.९.६७.२३

वायो, अर्चिषि अन्तरा पुरुषदेहे व्याप्ततेजोमध्ये विततं व्याप्तं पवित्रनामकं ब्रह्म तेन नः अस्माकम् अस्मान् पुनीहि ॥ २६ ॥

[1]यत्ते पवित्रमर्चिवदग्ने तेन पुनीहि नः ।
ब्रह्मसवैः पुनीहि नः ॥ २७ ॥

अर्चिवत्, अर्चिष्मत्, यत् ते तव, भस्मभूतं पावयित्वा त्रातीति व्युत्पत्त्या पवित्रनामकं ब्रह्म तेन पुनीहि नः । ब्रह्मसवैः ब्रह्मज्ञानाख्यसवैः नः पुनीहि । ब्रह्मज्ञानमुत्पाद्य नः पुनीहीत्यर्थः ॥ २७ ॥

[2]उभाभ्यां देव सवितः पवित्रेण सवेन च ।
मां पुनीहि विश्वतः ॥ २८ ॥

ज्ञानप्रसवहेतुना सवितः, सवितृनामकदेव, क्रीडादिगुणक हे वायो, पवित्रेण ब्रह्मणा सवेन ज्ञानेन च इत्युभाभ्यां मां विश्वतः सर्वस्मात् पुनीहि ॥ २८ ॥

[3]त्रिभिष्ट्वं देव सवितर्वर्षिष्ठैः सोम धामभिः ।
अग्ने दक्षैः पुनीहि नः ॥ २९ ॥

हे अग्ने सवितः देव, सौम्यरूपात्वात् सोम हे वायो, त्वं वर्षिष्ठैः भक्ताभीष्टवर्षणशीलैः दक्षैः त्रिभिः धामभिः क्षीराब्ध्यादिस्थानत्रयस्थभगवद्रूपैः नः पुनीहि ॥ २९ ॥

[4]पुनन्तु मां देवजनाः पुनन्तु वसवो धिया ।
विश्वेदेवाः पुनीत मा जातवेदः पुनीहि मा ॥ ३० ॥

१. ऐ. ३.२.४, ऋ.९.६७.२४ २. ऐ.३.२.४, ऋ.९.३७.२५
३. ऐ. १.३.४., ऋ.९.६७.२६ ४. ऐ.३.२.४, ऋ. ९.६७.२७

धिया बुद्ध्या बुद्धिपूर्वकं देवजनप्रभृतयो मां पुनन्तु, विश्वेदेवाः मां पुनीत पवित्रं कुरुत । हे जातवेदः अग्ने, मा मां पुनीहि ॥ ३० ॥

[1]आदित्प्रत्नस्य रेतसो ज्योतिष्पश्यन्ति वासरम् ।
परो यदिध्यते दिवा ॥ ३१ ॥

प्रत्नस्य पुरातनस्य रेतसो महारतिरूपस्य विष्णोः वासेन रमयतीति वासरं स्वसन्निधानेन सुखप्रदं ज्योतिः तेजः, आनन्दत्वात् आत् आकारवाच्यात् भगवतः एव तदनुग्रहादेवेति यावत् पश्यन्ति, उपासका देवाः दिवा दिवः परं परस्तात् यत्तेजः इध्यते दीप्यते, 'इन्धी-दीप्तौ' ॥ तत्तेज इति पूर्वेणान्वयः ॥ ३१ ॥

[2]यत्र ब्रह्मा पवमान छन्दस्यां वाचं वदन् ।
ग्राव्णा सोमे महीयते सोमेनानन्दं जनयन् इन्द्रायेन्दो
परि स्रव ॥ ३२ ॥

हे पवमान वायो, ब्रह्मा मुक्तचतुर्मुखः, यत्र यस्मिन् विष्णुलोके, छन्दस्यां छन्दस्सम्बन्धिनीं वाचं वदन् व्याकुर्वन् सोमे सौम्यरूपतया सोमनामकभगवद्विषये ग्राव्णा सुतेन सोमेन, भगवन्तमिष्ट्वा तत्प्रसादेन, स्वस्य आनन्दं जनयन् महीयते, तद्भक्तनिकरैः पूज्यते, तत्र लोके हे इन्दो इष्टं ददातीति व्युत्पत्त्या इन्दुनामक हे वायो, इन्द्राय विष्णवे तत्समीपमिति यावत् परिस्रव मां परिस्रावय ॥ ३२ ॥

---

१. ऐ.३.२.४
२. ऐ.३.२.४, ऋ.९.११३.६

[1]यत्र ज्योतिरजस्रं यस्मिन् लोके स्वर्हितम् ।
तस्मिन् मां धेहि पवमानामृते लोके अक्षित इन्द्रायेन्दो
परि स्रव ॥ ३३ ॥

यत्र लोके अजस्रं ज्योतिः निरन्तरं प्रकाशः, यस्मिन् लोके स्वः आनन्दरूपं विष्णवाख्यं ब्रह्म हितं सन्निहितमस्ति अमृते मृतिरहिते, अक्षिते नाशहीने, यस्मिन् लोके मां धेहि । इन्द्रायेत्यादि प्राग्वत् ॥ ३३ ॥

[2]यत्र राजा वैवस्वतो यत्रावरोधनं दिवः ।
यत्रामूर्यह्वतीरापस्तत्र माममृतं कृधीन्द्रायेन्दो परि स्रव ॥३४॥

यत्र यस्मिन् लोके वैवस्वतो विवस्वत्पुत्रो राजा मुक्तयमः दिवो-देव्याः अवरोधनं परिवारभूताः सर्वदेव्यः यह्वतीः स्यन्दमानाः अमूः आपः गङ्गाद्याः सन्ति तत्र माममृतं कृधि मुक्तं कुरु । इन्द्रायेत्यादि प्राग्वत् ॥ ३४ ॥

[3]यत्रानुकामं चरणं त्रिनाके त्रिदिवे दिवः ।
लोका यत्र ज्योतिष्मन्तस्तत्र माममृतं कृधीन्द्रायेन्दो परि स्रव
॥ ३५ ॥

त्रिनाके त्रिदिवसंज्ञके यत्र लोके दिवोदेव्याः सरस्वत्याः अनुकामं स्वेच्छाधीनं चरणं सञ्चारः यत्र लोकाः ब्रह्मादिनिवासगृहाः ज्योतिष्मन्तः

---

३. ऐ.३.२.४, ऋ.९.११३.७ २. ऐ.३.२.४, ऋ.९.११३.८
३. ऐ.३.२.४, ऋ.९.११३.९

प्रकाशवन्तो वर्तन्ते तत्र माम् अमृतं कृधि मुक्तं कुरु ॥ इन्द्रायेत्यादि प्राग्वत् ॥ ३५ ॥

[1]**यत्र कामा निकामाश्च यत्र ब्रध्नस्य विष्टपम् ।**
स्वधा च यत्र तृप्तिश्च तत्र माममृतं कृधीन्द्रायेन्दो परि स्रव ॥३६॥

यत्र लोके कामाः विषयाः निकामा नितरामिच्छाधीनाः सन्ति, यत्र ब्रध्नस्य सूर्यस्य विष्टपं स्थानं, स्वधा च सुखं, तृप्तिरलम्बुद्धिश्चास्ति तत्र माममृतमित्यादि ॥ ३६ ॥

[2]**यत्रानन्दाश्च मोदाश्च मुदः प्रमुद आसते ।**
कामस्य यत्राप्ताः कामास्तत्र माममृतं कृधीन्द्रायेन्दो परि स्रव ॥ ३७ ॥

यत्र लोके भगवद्भक्तिसुखान्यानन्दाः, मोदाः भोगनिमित्तकसुखानि, अल्पभोगनिमित्तकसुखानि मुदः, भोगविशेषनिमित्तकसुखानि प्रमुदः आसते तिष्ठन्ति, यत्र कामस्येच्छायाः कामाः विषयाः आप्ताः प्राप्ताः सन्ति, तत्र माममृतं कृधीत्यादि ॥ ३७ ॥

[3]**उद् वयं तमसस्परि ज्योतिष्पश्यन्त उत्तरम् ।**
देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥ ३८ ॥

वयं तमसोऽज्ञानात् उद्गताः, उत्तरं सर्वोत्तमं विष्ण्वाख्यं ज्योतिः परिपश्यन्तः अपरोक्षीकुर्वन्तः देवत्रा देवविषयेऽपि देवं सूर्यं सूरिप्राप्यं सर्वोत्तमं देवम् अगन्म प्राप्ताः स्म इति सूर्यमण्डलगः स्तूयते ॥ ३८ ॥

---

१. ऐ.३.२.४, ऋ.९.११३.१०   २. ऐ.३.२.४, ऋ.९.११३.११
३. ऐ.३.२.४, ऋ.१.५०.१०

[1]**ओष्ठा पिधाना न कुली दन्तैः परिवृता पविः ॥**
सर्वस्यै वाच ईशाना चारु मामिह वादयेत् ॥ ३९ ॥

ओष्ठा ओष्ठौ पिधाना न, युग्मकवाटाविव, कुली कुत्सितानि लीनानि यस्मात्सः, प्रलीनाशेषकुत्सितः इत्यर्थः, दन्तैः परिवृता दन्तान्तरालवर्तिनी, पविः पालकत्वात् सर्वस्मात् विशिष्टत्वाच्च पविः सवस्यै सर्वस्याः वाचः, ईशाना स्वामिनी इह सदसि मां चारु साधु वादयेत् ॥ ३९ ॥

[2]**रात्री व्यख्यदायती पुरुत्रा देव्य१क्षभिः ।**
विश्वा अधि श्रियोऽधित ॥ ४० ॥

रात्री व्यख्यदित्यष्टर्चसूक्तं गायत्रीछन्दस्कं रात्रिनामकविष्णुदुर्गोभयात्मकम् ।

आयती सर्वलोकेष्वागच्छन्ती, रात्री रतिदत्वेन रात्रीत्युक्तस्त्रीदेवतारूपो विष्णुः, तत्प्रतिमाभूता रात्रिदेवता दुर्गा च देवी अक्षभिः नयनैः, पुरुत्रा बहुधा व्यख्यत् ददर्श । विश्वा अधि लोकेषु श्रिता श्रियः अधित दध्रे धृतवती ॥ ४० ॥

[3]**ओर्वप्रा अमर्त्या निवतो देव्यु१द्वतः ।**
ज्योतिषा बाधते तमः ॥ ४१ ॥

देवी निवतः नीचान् उद्वतः- उच्चान् अमर्त्या अमर्त्यान् ब्रह्मादिसर्वजीवान् ओर्वप्रा आ उरु अप्राः, आसमन्तात् उरु उरुधा अप्राः

---

१. ऐ.३.२.५, शान्तिमन्त्रः   २. ऐ.३.२.४, ऋ.१०.१२७.१
३. ऐ.३.२.४, ऋ.१०.१२७.२

अपूरयत्। ज्योतिषा ज्ञानेन तमः अज्ञानं बाधते जीवानां नाशयति ॥ ४१ ॥

[1]निरु स्वसारमस्कृतोषसं देव्यायती ।
अपेदु हासते तमः ॥ ४२ ॥

(तृतीया) आयती आगच्छन्ती देवी, रात्रिदेवता दुर्गादेवी भगवांश्च उषसं शुक्लवर्णम् उषोनामकं प्रमदात्मकं स्वस्वरूपं स्वसारं तिरस्कृत्य नितरामकरोत्। तेन च रूपेण तम अप इत् उ हासते, अपहासत एव निराकरोत्येव ॥ ४२ ॥

सा नो अद्य यस्या वयं नि ते यामन्नविक्ष्महि ।
वृक्षे न वसतिं वयः ॥ ४३ ॥

[2](चतुर्थी) अद्य अस्मिन् दिने, उपलक्षणमेतत्, सर्वदिनेषु, सा रात्रिदेवता नोऽस्माकं स्वामिनी वर्तते इति भावः। यस्याः रात्रिदेव्याः वयश्च दासभूताः, कथं ते तव यामन् अन्नादिकं यमयत्यत्रेति यमनामके उदरे न्यविक्ष्महि प्रविष्टाः स्मः । कथं वृक्षे वसतिं नीडं वयः, 'विः पक्षिपरमात्मनोः' इत्युक्तेः पक्षिणः, न इव, पक्षिणो यथा वृक्षगतनीडं प्रविशन्ति तथेति ॥ ४३ ॥

[1]नि ग्रामासो अविक्षत नि पद्वन्तो नि पक्षिणः ।
नि श्येनासश्चिदर्थिनः ॥ ४४ ॥

१. ऐ.३.२.४, ऋ.१०.१२७.३
२. ऐ.३.२.४, ऋ.१०.१२७.४

(पञ्चमी) निग्रामास इति, न केवलं वयमेव त्वदुदरं प्रविष्टाः, किन्तु ग्रामासः बहुत्वहेतुना ग्रामनामकाः दैत्याः, 'आज्जसेरसुक्'[2] ग्रामा एव ग्रामासः, न्यविक्षत न्यविशन्, पद्वन्तः, पादमात्रप्रयायिनो मनुष्याश्च न्यविक्षत, श्येनासः श्येना एव श्येनासः, शः पूर्णानन्दो विष्णुः इनः स्वामीति जानन्तो देवाः चिदपि न्यविक्षत, अर्थिनः अर्थवन्तः कृतकृत्या मुक्ता अपि न्यविक्षत, अस्मदादयः सर्वेऽपि त्वद्गर्भवासिनः इति रात्रिदेवता स्तूयते । न्यविक्षत इत्यत्र विशतेः [3]'सिब्बहुलं लेटि' इति सिपि सति सकारस्य षत्वे कषयोगे क्षेति रूपम्। नेर्विशः[4] इत्यात्मनेपदम् ॥ ४४ ॥

[5]यावया वृक्यं१वृकं यवयस्तेनमूर्म्ये ।
अथा नः सुतरा भव ॥ ४५ ॥

(षष्ठी)हे ऊर्म्ये ऊरीकृतप्रमाणे प्रमाणप्रतिपाद्ये इति यावत्। देवि ! वृक्यं वृकस्वभावं क्रूरस्वभावम् असुरप्रकृतिं जनं मत्सकाशात् यावय निर्यापय । वृकं क्रूरत्वात् वृकनामकम् असुरं यावय, स्तेनं ब्रह्मस्तेनं महासुरं यावय उच्चाटय, अथ असुराद्युच्चाटनानन्तरं नः अस्माकं सुतरा सुखप्रदा भव ॥ ४५ ॥

[6]उपमा पेपिशत् तमः कृष्णं व्यक्तमस्थित ।
उष ऋणेव यातय ॥ ४३ ॥

१. ऐ.३.२.४, ऋ.१०.१२७.५ २. पा.सू. ७.१.५०
३. पा.सू. ३.१.३४ ४. पा.सू. १.३.१७
५. ऐ.३.२.४,ऋ.१०.१२७.६ ६. ऐ.३.२.४, ऋ.१०.१२७.७

(सप्तमी) पेपिशत् पेशलम् अज्ञानिमनोहरं कृष्णं कृष्णवर्णं तमः मामुप मत्समीपे व्यक्तमस्तित, स्थितमभूत्, (तत् तमः) हे उषः प्रकाशस्वरूपे देवि ऋणेव ऋणमिव यातय अपनय ॥ ४६ ॥

[१]उप ते गा इवाकारं वृणीष्व दुहितर्दिवः ।
रात्रि स्तोमं न जिग्युषे ॥ ४७ ॥

(अष्टमी) हे दिवोदुहितः ज्ञानपुत्रि ज्ञानाभिव्यञ्ज्ये ! रात्रिदेवते, तव स्तोमं स्तुतिम् उपाकरम् अकार्षम् । शब्विकरणं छान्दसम् । कथं जिग्युषे जयिने स्तोमं न स्तुतिमिव, चारुबुद्धित्वात् सामाद्यमागमाश्च[२] शत्रून् जित्वा समागताय यथा स्तुतिं कुर्वन्ति तथा उपाकरमित्यर्थः । स्तोमं वृणीष्व स्तोमश्रवणेन मयि प्रसादं कुरु । कथं गा इव, ब्राह्मणो दत्ताः गाः स्वीकृत्य दातरि यथा प्रसादं करोति तथा प्रसादं कुर्वन्ति । यद्वा ब्राह्मणाय तत्प्रीत्यर्थं गाः प्रयच्छति यथा तथा अहं त्वत्प्रीत्यर्थं स्तोत्रमुपाकारं त्वं वृणीष्वेति ॥ ४७ ॥

महाभूत्युक्तमन्त्राणां भाष्याद्युक्तार्थसङ्ग्रहः ।
राघवेन्द्रेण यतिना कृतो नित्यानुसन्धये ॥

॥ इति श्रीमद्राघवेन्द्रतीर्थश्रीपादविरचितः
बह्वृचोपनिषदुक्तमन्त्रार्थसङ्ग्रहः समाप्तः ॥

॥ श्री कृष्णार्पणमस्तु ॥

---

१. ऐ.३.२.४, ऋ.१०.१२७.८

२. अस्मिन् वाक्ये ‘चारुबुद्धित्वात् सामाद्यमागमाश्च’ इति अनन्वितं दृश्यते ।

PUBLICATIONS OF
POORNAPRAJNA SAMSHODHANA MANDIRAM

1. **Upaniṣadbhāṣyam** of Śri Madhvacārya — p. : 618
   Edited by : **Prof. D.Prahlada Char** — **Rs. 200/-** *(Out of stock)*
2. **Gītābhāṣyam** of Śri Madhvacārya (1-2 chapters) — p. : 672
   Edited by : **Prof. D.Prahlada Char** — **Rs. 125/-**
3. **Tatvodyota-Prakaraṇam** of Śri Madhvacārya — Pages : 281
   Edited by : **Prof. A. Haridasa Bhat** — **Rs. 75/-**
4. **Viṣṇutatvavinirṇaya** of Śri Madhvacārya (Part-I) — p. : 589
   Edited by : **Prof. A. Haridasa Bhat** — **Rs. 250/-** *(Out of stock)*
5. **Viṣṇutatvavinirṇaya** of Śri Madhvacārya (Part-II) — p. : 589
   Edited by : **Prof. A .Haridasa Bhat** — **Rs. 250/-**
6. **Śrimad-Bhāgavatam** of Śri Vedavyāsa — p. : 939
   Edited by : **Pt. P.S.Sheshagiri Acharya** — **Rs. 150/-** *(No discount)*
7. **Bhāratīyadarśaneṣu Pratyakṣa-svarūpam** — p. : 151
   Edited by : **Vidwan P.V. Upadhyaya** — **Rs. 50/-**
8. **Pañcalakṣaṇī** — p. : 130
   Edited by : **Prof. A .Haridasa Bhat** — **Rs. 75/-**
9. **Sarvamūla-śabda-nighantuḥ** — p. : 630
   Edited by : **Dr. Ranganatha Katti & Dr. Shankaranarayana Adiga** — **Rs. 250/-**
10. **Subhāṣitāni** - — p. : 90
    Edited by : **Dr. A.V. Nagasampige** — **Rs. 20/-**
11. **Pramāṇa-sangrahaḥ** of Narahari Ācārya — p. : 150
    Edited by : **Dr. A.V. Nagasampige** — **Rs. 30/-**
12. **Laghu-Rāmāyaṇam** — p. : 50
    Edited by : **Vidwan P.V. Upadhyaya** — **Rs. 20/-**
13. **Kāvyanavanītam and Kāvyalakṣaṇasangrahaḥ** — p. : 80
    Edited by : **Dr. Shankaranarayana Adiga** — **Rs. 20/-**
14. **Alankārasūtr-bhāṣyam & Camatkāracāmīkaram** — p. : 80
    Edited by : **Vidwan Ranganatha Katti** — **Rs. 20/-**
15. **Śrutisiddhānta-sangrahaḥ** — p. : 350
    Edited by : **Dr. A.V. Nagasampige** — **Rs. 140/-**

16. **Brahmasūtra-Bhāṣyam** of Śri Madhvācārya p. : 100 + 691
Edited by : **Prof. D. Prahlada Char** **Rs. 121/-** ***(No discount)***
Co-Editers : **Dr. Ranganatha Katti & Dr. Shankaranarayana Adiga**

17. **Gīta-Bhāṣyam** of Śri Madhvācārya (3-4 Chapters) p.:70+402
Edited by : **Prof. Parkala Venkatesha Bayari** **Rs. 200/-**

18. **Mukti-Tatvam** p. : 72+60+12
Edited by : **Dr. Veeranarayana Pandurangi**
& Vidwan Pradeepasimhacharya **Rs. 40/-**

19. **Bhedataranginī** p. : 62+165
Edited by : **Prof. K. Hayavadana Puranik** **Rs. 50/-**

20. **Chandogyopaniṣad-Bhāṣyam** of Śri Madhvācārya
Edited by : **Dr. Ranganatha Katti** p. : 79+790
& Dr. Shankaranarayana Adiga **Rs. 250/-**

21. **Chandogyopaniṣat**
Edited by : **Dr. Shankaranarayana Adiga** p. : 70+280
& Pt. Ranganatha Katti **Rs. 125/-**

22. **Yājñīyopaniṣat-prabhā** of Śri Kṛṣṇāvadhūta)
Edited by : **Dr. A.V. Nagasampige and** p. : 64
Vidwan P.V. Upadhyaya **Rs. 20/-**

23. **Padavṛtti-svarūpa-vicāraḥ** p. : 214
Edited by : **Dr. H. Satyanarayanacharya** **Rs. 60/-**

24. **Samavāya-vimarśaḥ** (A critique of Samavaya) p. : 180
Edited by : **Dr. Pandurangavitthalacharya Pandurangi**
Dr. Veeranarayanacharya Pandurangi **Rs. 80/-**

25. **Prajna - 2005 -**
Edited by : **Dr. A.V. Nagasampige,** Pages : 145
Co Editer : **Dr. Shankaranarayana Adiga** **Rs. 60/-**

26. **Bṛhadāranyakopaniṣat**
(with Khandārtha of Śri Rāghavendratīrtha) p. : 101 + 289
Edited by : **Dr. A.V. Nagasampige** **Rs. 160/-**

27. **Smṛti-māṇikya-sangrahaḥ** p. : 210 + 64
Edited by : **Dr. A.V. Nagasampige** **Rs. 80/-**

28. **Upaniṣad-bhāṣyam (Vol. I)** (Īśā-Kena-Katha-Praśna) p.: 78 + 634
Edited by : **Dr. Shankaranarayana Adiga** **Rs. 200/-**
and Dr. Ranganatha Katti

29. **Dvaitabhūṣaṇam** p. : 20 + 284
Edited by : **Prof. A. Haridasa Bhat** **Rs. 100/-**

30. **Bṛhadāraṇyakopaniṣad** p. : 48 + 842
Edited by : **Dr. A.V. Nagasampige** **Rs. 240/-**
and Vidwan R.V. Nagasampige

31. **Advaita-sūtrārtha-paddhatiḥ** p. : 24 + 118
Edited by : **Prof. D. Prahlada Char** **Rs. 30/-**

32. **Tāratamya-Prabandhāḥ** p. : 82 + 526
Edited by : **Dr. A.V. Nagasampige** **Rs. 200/-**

33. **Ṛgarthoddhāraḥ** p. : 48 + 326
Edited by : **Dr. Shankaranarayana Adiga** **Rs. 120/-**
& Dr Ranganatha Katti

34. **Tattvatraya-culuka-sangrahaḥ** Pages : 148
Tattvatrayam & Viśiṣṭādvaita-navanītam
Edited by : **Dr. A.V. Nagasampige** **Rs. 60/-**

35. **Gīta-Bhāṣyam** of Śri Madhvācārya (5-8 Chapters) p.:20+480
Edited by : **Prof. Parkala Venkatesha Bayari** **Rs. 200/-**

36. **Gīta-Tātparyam** of Śri Madhvācārya p. : 480
Edited by : **Prof. D. Prahlada Char** **Rs. 200/-**

37. **Tattvapetikā** of Śri Vyāghrapurī Narasimhācārya p. : 100
Edited by : **Dr. A.V. Nagasampige** **Rs. 40/-**

38. **Prajna - 2006** p. : 145
Edited by : **Dr. A.V. Nagasampige** **Rs. 60/-**
and Dr. Ranganatha Katti

39. **Sṛṣṭimuktāvalī** p. : 104
Edited by : **Dr. A.V. Nagasampige** **Rs. 40/-**
Joint Editor **: Dr. P.P. Sridhar Upadhyaya**

40. **Sri Madhvacharya ke upadesha - Unhi ke shabdo me**
By : **Dr. B.N.K. Sharma** p. : 228
Hindi Translation : **Krishna A. Harnahalli** **Rs. 60/-**

41. **Vaiyāsika-Nyāyamālā** p. : 244/-
Editor : **Dr. Rajalaskhmi Srinivasan** **Rs. 100/-**

42. **Bahvṛcopaniṣdukta-mantrārtha-sangrahaḥ** p. : 48/-
Editor : **Vidwan P.V. Upadhyaya** **Rs. 40/-**

43. Gīta-Sāroddhāra p. : 24 + 347
by H.H. Śri Vishveshatirtha Swamiji **Rs. 100/-**

44. Kārakavāda Pages : 110
Editor : **Dr. Srinivasa Varakhedi** **Rs. 20/-**

45. Tarka-Navanītam p. : 50/-
Editor : **Dr. V.N.K. Pandurangi and Dr. Srinivasa Varakhedi** **Rs. 20/-**

46. Srimad Brahmasutra Bhasyam
(Sheshatatparyachandrikasahitam-Part -1) p. : 95+380
Editor :**Prof.K.Hayavadana Puranik** **Rs. 250/-**

47. Bhedojjivanam p. : 44 + 575
Editors : **Dr. H. Satyanarayanacharya &** **Rs. 240/-**
Dr. Tirumala Kulkarni

48. Srimad Brahmasutra Bhasyam p. : 57+666
(Bhashyadeepika-Sutradeepika Sahitam - Chapter-1) **Rs. 240/-**
Editor : **Dr. Shankaranarayana Adiga**

49. Srimad Brahmasutra Bhasyam p. : 56+445
(Bhashyadeepika-Sutradeepika Sahitam - Chapter-2) **Rs. 200/-**
Editor : **Dr. Ranganaha Katti**

50. Prajna - 2007 p. : 109
Editor : **Dr. A.V. Nagasampige** **Rs. 60/-**

51. Sri Manyusuktam & Sri Gharmasuktam p. : 66 + 113
Editor : **Vidwan C.R.Pradipasimhacharya** **Rs. 100/-**

52. Gita-Vivrti (With Kannada translation) p. : 104+ 962
Editors : **Scholars of Poornaprajna Vidyapeetha** **Rs. 200/-**

53. Sarva-samarpana-stotram p. : 24 + 17
Editor : **Dr. A.V. Nagasampige** **Rs. 20/-**

54. Srimad-Bhagavata-Anukramanika p. : 6 + 58
Srimad-Bhagavata-Sangraharatnamala **Rs. 20/-**
Srimad-Bhagavata-Dashashloki
Editor : **Dr. A.V. Nagasampige**

55. Muktimuktavali p. : 16 + 32
Editor : **Dr. A.V. Nagasampige** **Rs. 20/-**

56. Tattvasara Pages : 18 + 82
Editor : **Dr. A.V. Nagasampige** **Rs. 40/-**

57. Jitane-Stotram p : 8 + 82
Editor : **Dr. A.V. Nagasampige** **Rs. 60/-**

58. Kalpanaratnam p. : 19 + 66
Editor : **Vidwan H.V. Nagaraja Rao** **Rs. 60/-**

59. Brhati-sahasram p. : 18 + 551
Editor : **Vidwan P.S. Sheshagiri Acharya** **Rs. 300/-**

60. Anugraha A collection of lectures of Sri Pejavara Swamiji p. : 120
Into English : **Sri C.K. Ramamurthy** **Rs. 40/-**

61. Tantra-sara-sangraha
Editor : **Dr. Tirumala Kulkarni** **Rs. 200/-**

62. Srimad Brahmasutra Bhasyam p. : 50+474
(Bhashyadeepika-Sutradeepika Sahitam - Chapter-3)
Editor : **Dr. A.V. Nagasampige** **Rs. 260/-**

63. Srimad Brahmasutra Bhasyam p. : 47+190
(Bhashyadeepika-Sutradeepika Sahitam - Chapter-4)
Editor : **Vidwan P.V. Upadhyaya** **Rs. 100/-**

64. Abhinava-Kavyalankra-Sutra-Vimarsha p. : 12 + 100
Editors : **Dr. A.V. Nagasampige & Dr. K.S. Adiga** **Rs. 50/-**

65. Chandrikaprakasha-Samayapadasara p. : 10+204
Editor : **Prof. K. Hayavadana Puranik** **Rs. 100/-**

66. Prajna - 2008-09 Pages : 142
Editor : **Dr. A.V. Nagasampige** **Rs. 100/-**

67. Flowers & Light p. : 8 + 70
Into English : **Prof. L. Jaya Rao** **Rs. 40/-**

68. Siddhanta Kalpavalli p. : 20 + 100
Editor : **Dr. A.V. Nagasampige** **Rs. 80/-**

69. Sri Jagadguru Renuka-geeta p. : 36 + 218
Editor : **Dr. M. Sivakumara Swamy** **Rs. 80/-**

70. Stotra Ratbnavali (with Kannada translation) p. : 36 + 266
Editor : **Dr. A.V. Nagasampige** **Rs. 100/-**

71. Hora-Krishneeya p. : 24 + 216
Editor : **Vidwan A.V. Raghavendra Bhat** **Rs. 100/-**

72. Srshti-swaroopam p. : 12 + 180
Editors :**Dr. A.V. Nagasampige & Dr. Ranganatha Katti** **Rs. 100/-**

73. Tatparya-chandrika of Sri Vyaṣatirtha p. : 76 + 504
Editor : **Dr. Veeranarayana Pandurangi** **Rs. 400/-**

74. Pramana-paddhati of Sri jayatirtha p. : 80 + 257
Editor : **Dr. Shankaranarayana Adiga** **Rs. 80/-**

75. Panchalakshani-shatakoti & Panchalakshani-sarvasvam p. :240
Editor : **Dr. Dr. Veeranarayana Pandurangi** **Rs. 120/-**

76. Sutrartha-sangraha of Sri Venkatapatyacharya p. : 94 + 456
Editor : **Dr. Ranganatha Katti** **Rs. 240/-**

77. **Sri Mahaitareyopanishad-bhashyam** p. : 44 + 516
Editor : **Vidwan P.V. Upadhyaya** **Rs. 240/-**

78. **Srimad-Vishnu-tatva-vinirnaya** (in Kannada) p. : 304
By : **H.H. Sri Vishveshatirtha Swamiji** **Rs. 160/-**

79. **Munda-Mandukya-Taittiriyopanishads** p. : 580
Editor : **Dr. A.V. Nagasampige** **Rs. 240/-**

80. **Natyashastram** of Bharata Muni p. : 214
Editor : **Dr. M. Sivakumara Swamy** **Rs. 100/-**

81. **Srimad Brahmasutra Bhasyam** p. : 768
(Sheshatatparyachandrikasahitam-Part -3) **Rs. 400/-**
Editor :**Prof.K.Hayavadana Puranik**

82. **Prajna -2010-11** p. : 85
Editor : **Dr. A.V. Nagasampige** **Rs. 80/-**

83. **Pramana-paddhati** p. : 199
Editor : **Dr. P.N. Pandurangi** **Rs. 120/-**

84. **Tatvasankhyana** p. : 10+219
Editor : **Prof. D. Prahlada Char** **Rs. 100/-**

85. **Achara-samhite** p. : 80
Editor : **Dr. A.V. Nagasampige** **Rs. 40/-**

86. **Geetartha-sangraha (Hindi)** p. : 664
Editor : **Sri Krishna A. Harnahalli** **Rs. 200/-**

87. **Gavo Vishvasya Matarah** p. : 8+77
Editor : **Dr. A.V. Nagasampige** **Rs. 60/-**

88. **Jnana-swarupam** p. : 8+116
Editor : **Dr. A.V. Nagasampige** **Rs. 80/-**

89. **Mantrakshate** p. : 8+74
Into English : **Prof. L. Jaya Rao** **Rs. 40/-**

90. **Apaccheda-nyaya-vaishamyam** p. : 6+42
Into English : **Vidwan Vasudevacharya Sattigeri** **Rs. 60/-**

91. **Bhagavadarchana-kalpalata** p. : 20+232
Into English : **Vidwan Vishnumurti Bhat** **Rs. 200/-**

92. **Tales of Wisdom** p. : 4+60
By : Sri Vishveshatirtha Swamiji **Rs. 40/-**

93. **Original Sanskrit Works of Modern Karnataka State** p. : 12+58
By : **Dr. A.V. Nagasampige** **Rs. 40/-**

94. **Sanskritam Vishwatomukham** p. : 14+128
By : **Dr. A.V. Nagasampige** **Rs. 60/-**